# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (२८)

## २०.१२.२०११

- चकारान्तः पुंलिङ्गः ‘उदच्’ शब्दः ।
- उदङ्, उदञ्चौ, उदञ्चः ।
- उदञ्चम्, उदञ्चौ

- शसादौ अचि

# ४२०. उद ईत् (६.४.१३९)

- पदद्वयम् । उदः, ईत् ।
- 'अङ्गस्य' (६.४.१) इति, 'भस्य' (६.४.१२९) इति च अधिक्रियते । 'अल्लोपोऽनः' (६.४.१३४) इत्यतः 'अत्' इति, 'अचः' (६.४.१३८) इति च अनुवर्तते ।
- उच्छब्दात् परस्य लुप्तनकारस्य अञ्चतेः भस्य अकारस्य ईत् स्यात् ।

- उदच् अस्
- उद् ईच् अस् ('उद ईत्')
- उदीचः
- उदीचा, उदग्भ्याम् इत्यादि ।

# ४२१. समः समि (६.३.९३)

- पदद्वयम् । समः, समि ।
- 'विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये' (६.३.९२) इत्यतः 'अञ्चतावप्रत्यये' इति अनुवर्तते ।
- अप्रत्ययान्ते अञ्चतौ परे समः समिः आदेशः स्यात् ।

- सम् अच्
- समि अच्  ('समः समि')
- सम्यच्  ('इको यणचि')
- सम्यङ्, सम्यञ्चौ, सम्यञ्चः ।
- समीचः । समीचा ।

# ४२२. सहस्य सध्रिः (६.३.९५)

- पदद्वयम् । सहस्य, सध्रिः ।
- 'विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये' (६.३.९२) इत्यतः 'अञ्चतावप्रत्यये' इति अनुवर्तते ।
- अप्रत्ययान्तेऽञ्चतौ परे ।
- सध्र्यङ् ।

# ४२३, तिरसस्तिर्यलोपे (६.३.९४)

- तिरसः, तिरि, अलोपे ।
- ‘विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये’ (६.३.९२) इत्यतः ‘अञ्चतावप्रत्यये’ इति अनुवर्तते ।
- अलुप्त-अकारे अञ्चतौ अप्रत्ययान्ते परे तिरसः तिरि-आदेशः स्यात् ।
- तिर्यङ्, तिर्यञ्चौ, तिर्यञ्चः ।
- तिर्यञ्चम्, तिर्यञ्चौ, तिरश्चः ।
- तिरश्चा, तिर्यग्भ्याम् इत्यादि ।

# ४२४. नाञ्चेः पूजायाम् (६.४.३०)

- पदत्रयम् । न, अञ्चेः, पूजायाम् ।
- पूजार्थस्य अञ्चतेः उपधायाः नस्य लोपः न स्यात् ।

- प्र अन्च् (क्विन्) व्
  - अनेन सूत्रेण निषिद्धत्वात् 'अनिदितां हल उपधायाः क्ङिति' इति नलोपो न ।
- प्र अन्च्
- प्रान्च्
- प्राञ्च्   (अनुस्वारपरसवर्णौ)

- अलुप्त-नकारत्वात् न नुम् ।
- प्राङ्, प्राञ्चौ, प्राञ्चः ।
- प्राञ्चम्, प्राञ्चौ ।
- नलोपाभावाद् अकारलोपो न ।
- प्राञ्चः ।
- प्राञ्चा, प्राङ्भ्याम् इत्यादि ।
- सर्वेषु रूपेषु नकारः श्रूयते ।
- प्राङ्खषु, प्राङ्क्षु, प्राङ्षु ।
- एवं पूजार्थे प्रत्यङ्ङादयः ।

- ‘क्रुञ्च कौटिल्याल्पीभावयोः’ ।
- अस्य ‘ऋत्विग्-दधृक्-स्रग्-दिग्-अञ्चु-युजि-क्रुञ्चां च’ इत्यनेन नलोपाभावोऽपि निपात्यते ।
- सूत्रेण क्विन् प्रत्ययः क्रियते । किति प्रत्यये परे ‘अनिदिताम्..’ इति नलोपस्य अभावः निपात्यते ।
- क्रुङ्, क्रुञ्चौ ।
- क्रुङ्भ्याम् इत्यादि ।

- चकारान्तः पुंलिङ्गः 'पयोमुच्' शब्दः ।
- 'चोः कुः' ।
- पयोमुक्/पयोमुग्, पयोमुचौ, पयोमुचः ।

- चकारान्तः पुंलिङ्गः ‘सुवृश्च्’ शब्दः ।
- ‘ओव्रश्चू छेदने’ इति धातोः क्विबन्तः ।
- सु व्रश्च् (क्विप्) व्
- सु वृ अश्च् व् (‘ग्रहि-ज्या-वयि-व्यधि-वष्टि-विचति-वृश्चति-पृच्छतीनां ङिति च’ - ६.१.६०)
- सु वृश्च् व् (‘संप्रसारणाच्च’ - ६.१.१०८)
- सुवृश्च् (‘वेरपृक्तस्य’ - ६.१.६७)

- ‘व्रश्च-भ्रस्ज-सृज-मृज-यज-राज-भ्राज-च्छशां षः’ (८.२.३६) इति षत्वम् । ‘स्कोः...’ इति सलोपः । जश्त्वचर्त्वे ।
- सुवृश्च्   (सुँ)  स्
- सुवृश्च्   (‘हल्ङ्याब्भ्यः...’ - ६.१.६८)
- सुवृस्  ष्   (‘व्रश्चभ्रस्ज...’ - ८.२.३६)
- सुवृ   ष्   (‘स्कोः संयोगाद्योरन्ते च’ - ८.२.२९)
- सुवृड्   (‘झलां जशोऽन्ते’ - ८.२.३९)
- सुवृट्   (‘वाऽवसाने’ - ८.४.५६)
- सुवृश्चौ, सुवृश्चः । सुवृट्त्सु, सुवृट्सु ।